अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् .......................

**Paper Code**
**BV-504**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**
**बी. ए. व्याकरणम् (सत्रम् : पंचमम्)**
**संस्कृतम्**
**चतुर्थपत्रम्–वैदिकसिद्धान्तपरिचयः**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**अवधेयम् :** प्रश्नपत्रमिदं 'क, ख, ग' इति खण्डत्रये विभक्तमस्ति। प्रतिखण्डम् अङ्कनिर्धारणं तत्रैव द्रष्टुं शक्यते। प्रतिखण्डं प्रदत्तानां निर्देशानामनु-सरणपुरस्सरमेव प्रश्नानामुत्तराणि लेखनीयानि 'सर्वे प्रश्ना अनिवार्याः'।

## (खण्ड – "क" अथर्ववेदः) 25 अङ्काः

**प्रश्नः1– अथर्ववेदीयब्रह्मचर्यसूक्तस्य स्मृताः केचन दश मन्त्रा लेखनीयाः।** **(1X10=10)**

**प्रश्नः2– अधोलिखितेषु मन्त्रेषु चतुर्णां मन्त्राणां शब्दार्थपुरस्सरं स्वशब्दैरर्थो बोधनीयः।** **(2.5X4=10)**

(क) आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः।।
(ख) आचार्यो मृत्युर्वरुणः सोम ओषधयः पयः।
जीमूता आसन्त्सत्वानस्तैरिदं स्वराभृतम्।।
(ग) ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वराभरत्।।
(घ) ब्रह्मचार्येति समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः।
स सद्य एति पूर्वस्मादुत्तरं समुद्रं लोकान्त्संगृभ्य मुहुराचरिक्रत्।।
(ङ) ब्रह्मचारी ब्रह्म भ्राजद्बिभर्ति तस्मिन्देवा अधि विश्वे समोताः।
प्राणापानौ जनयन्नाद् व्यानं वाचं मनो हृदयं ब्रह्म मेधाम्।।

**प्रश्नः3– निम्नलिखितानां मन्त्राणाम् ऋषिदेवताछन्दांसि ज्ञापयन्तु ?** **(1X5=05)**
(क) पृथक् सर्वे प्राजापत्या ............................ ब्रह्मचारिण्याभृतम्।।
(ख) ब्रह्मचर्येण कन्या ..................................... धासं जिगीषति।।
(ग) इयं समित् पृथिवी ............................. तपसा पिपर्ति।।
(घ) इत्र अर्वागन्य इतो ........................... तपसा ब्रह्मचारी।।
(ङ) चक्षुः श्रोत्रं ......................................... लोहितमुदरम्।।

## (खण्ड – "ख") 25 अङ्काः
## (दर्शनम्) (तर्कसंग्रहः)

**प्रश्नः1– पृष्टेषु प्रश्नेषु त्रयः प्रश्नाः साधनीयाः ।** **(5X3=15)**
(क) अभावस्य किं लक्षणम्? सोद्देशं व्याख्यायन्तु ?
(ख) 'ज्ञानाधिकरणमात्मा' इत्येतद् स्पष्टं कुर्वन्तु ?
(ग) 'पदार्थानां निरूपणं' तर्कसंग्रहानुसारेण बोधयन्तु ?
(घ) कारणस्य किं लक्षणम् ? सभेदं वर्णयन्तु ?

**प्रश्नः2– निम्नलिखितेषु विषयेषु केषाञ्चिच्चतुर्णामेव टिप्पणी लेखनीया।** (2.5X4=10)

(क) दुःखः
(ख) सामान्यम्
(ग) कालः
(घ) स्पर्शः
(ङ) गुणः ।

## (खण्ड – ‘‘ग’’) 20 अङ्काः

## (उपनिषद्) (तैत्तिरीयोपनिषद्)

**प्रश्नः1– तैत्तरीयोपनिषदो भृगुवल्ल्याः स्मृताः केचनं चत्वारोऽनुवाका लेखनीयाः ।** (2.5X4=10)

**प्रश्नः2– निम्नोक्तेषु द्वौ प्रश्नौ समाधेयौ ।** (5X2=10)

(क) पञ्चकोशानां संक्षेपेण वर्णनं कुर्वन्तु ।
(ख) ‘अन्नं न परिचक्षीत’ इत्येतस्य व्याख्या करणीया ?
(ग) ‘आनन्दो ब्रह्म’ इत्यधिकृत्य यद् भृगुवल्ल्यामुक्त तस्य वर्णनं कुर्वन्तु ?

**--------------X--------------**